ग्रन्थ वेदान्तसार
ले. सदानन्द योगीन्द्र
पत्र 6

अपूर्ण
विषय - दर्शन

एवमज्ञानमपिस्वावृतात्मनियपाशक्त्या आकाशादिप्रपंचमुद्भावयति
तादृशसामर्थ्यंतदुक्तम् विक्षेपशक्तिर्लिंगादिब्रह्मांडांतंजगत्सृजेदितिश्रु
तेः शक्तिद्वयवदज्ञानोपहितंचैतन्यंस्वप्रधानतयानिमित्तंस्वोपाधि
प्रधानतयोपादानंचभवति यथालूतातंतुकार्यंप्रतिस्वप्रधानत
या निमित्तंस्वशरीरोपाधिप्रधानतयोपादानंचभवति तमःप्रधानवि
क्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशआकाशाद्वायुर्वायोरग्निरग्ने
रापः अद्भ्यःपृथिवीतिचोत्पद्यते तस्माद्वाएतस्मादात्मनः आकाशः
संभूतइत्यादिश्रुतेः तेषुचाकाशादिषुजाड्याधिक्यदर्शनात्तमःप्राधान्यं

मेघोऽनेकयोजनमायतमादित्यमंडलमवलोकयितृनयनपथपिधा
यकतया यथाच्छादयतीव तथाज्ञानं परिछिन्नमपि यथाप्रातमात्मा
नमपरिछिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकतयाच्छादयतीवं
व तादृशं सामर्थ्यं तदुक्तम् घनछन्नदृष्टिर्घनछन्नमर्कं यथा मन्यते निः
प्रभं चातिमूढः तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धि। स्वरू
पोऽहमात्मा अनयावृतस्यात्मनः कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादि
संभावनापि भवति यथा स्वाज्ञानेनावृतायां रज्जौ सर्पत्वसंभावना वि
क्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकं समुद्भाव

वे॰सा॰
५

1479

ष्ट्योरपिवनवृक्षावच्छिन्नाकाशयोश्चजलाशयजलाशयजलगत-
प्रतिबिंबाकाशयोश्चाभेदः एषसर्वेश्वरइत्यादिश्रुतेः वनतदवच्छि-
न्नाकाशयोर्जलाशयतज्जलगतप्रतिबिंबाकाशयोर्वाधारानुपहिता-
काशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतंयदनुपहितंचैतन्यं
तत्तुरीयमित्युच्यते शिवमद्वैतंचतुर्थंमन्यंतेइत्यादिश्रुतेः इदमेवतुरी-
यंशुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्यांतप्तायःपिंडवदविवि-
क्तंसन्महावाक्यस्यवाच्यंविविक्तंसल्लक्ष्यमित्युच्यते अज्ञानस्यावरण
विक्षेपनामकमस्तिशक्तिद्वयंम आवरणशक्तिस्तावत अल्पोपि-

राम
५

एकाज्ञानावभासकत्वात् अस्य प्राज्ञत्वमस्पष्टोपाधितयाऽनति-
प्रकाशकत्वात् अस्यापीयमहंकारादिकारणत्वात् कारणशरीरमा-
नंदप्रचुरत्वादेव हेतोरानंदमयकोशः सर्वोपरमत्वात्सुषुप्तिः अतए-
व स्थूलसूक्ष्मप्रपंचलयस्थानमितिचोच्यते तदानीमेतावीश्वर-
प्राज्ञौ चैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानंदमनुभवतः
आनंदभुक् चेतोमुखः प्राज्ञ इत्यादिश्रुतेः सुखमहमस्वाप्सं न किं-
चिदवेदिषम् इत्युत्थितस्य परामर्शोपपत्तेश्च अनयोः समष्टिव्यष्ट्योः
वनवृक्षयोरिव जलाशयजलयोरिव चाभेदः एतदुपहितयोरीश्वरप्रा

ज्ञस्ये

वे॰सा॰ दित्यादिश्रुतेः अस्यैषं समष्टिरखिलकारणत्वात्कारणशरीरमानंद
५ प्रचुरत्वात्कोशवदाच्छादकत्वाच्चानंदमयः कोशः सर्वोपरतत्वात्सुषुप्तिः
अत एव स्थूलसूक्ष्मप्रपंचलयस्थानमिति चोच्यते यथा वनस्य व्य
ष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशः यथा वा जलाशयस्य व्यष्ट्यभिप्रा
येण जलानीति तथाऽज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः
इंद्रो मायाभिः पुरुरूप ईयते इत्यादिश्रुतेः अत्र व्यस्तसमस्तव्यापित्वेन
व्यष्टिसमष्टिताव्यपदेशः इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्वप्रधा
ना एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते

राम

1482

भवात् देवात्मशक्तिं स्वगुणैर्निगूढामित्यादिश्रुतेश्च इदमज्ञानं समष्टि
व्यष्ट्यभिप्रायेणैकमनेकमिति व्यवह्रियते तथाहि वृक्षाणां सम [यथा]
ष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशः यथा वा जलानां समष्ट्यभिप्रा
येण जलाशय इति तथा नानात्वेन प्रतिभासमानानां जीवगताज्ञा
नानां समष्ट्यभिप्रायेण तदेकत्वदेशः अजामेकामित्यादिश्रुतेः इयं
समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना एतदुपहितं चैतन्यं स
र्वज्ञत्वसर्वनियंतृत्वादिगुणकं सदव्यक्तमंतर्यामी जगत्कारणमीश्वर
इति च व्यपदिश्यते सकलाज्ञानावभासकत्वात् यः सर्वज्ञः स सर्ववि

तरतिशोकमात्मविदितिश्रुतेः ब्रह्मवेदब्रह्मैवभवतीत्यादिश्रुतेः अयमधिकारीज
न्ममरणादिसंसारानलसंतप्तः अतिप्रदीप्तशिराजलराशिमिवोपहारपा
णिः श्रोत्रियंब्रह्मनिष्ठंगुरुमुपसृत्यतमनुसरति समित्पाणिः श्रोत्रियंब्र
ह्मनिष्ठमित्यादिश्रुतेः सपरमकृपयाऽध्यारोपापवादन्यायेनतमुपदि
शतितस्मैसविद्वान् प्रपन्नायआत्मतत्वंप्राहेत्यादिश्रुतेः असर्पभूतायां
रज्जौसर्पारोपवद्वस्तुन्यवस्त्वारोपोऽध्यारोपः वस्तुसच्चिदानंदाद्वयंब्रह्मअ
ज्ञानादिसकलजडसमूहोऽवस्तु अज्ञानंतुसदसद्भ्यामनिर्वचनीयम्
त्रिगुणात्मकंज्ञानविरोधिभावरूपंयत्किंचिदितिवदंति अहमज्ञइत्या

तद्व्यतिरिक्तविषयेभ्यो निवर्तनं निवर्तितानांचसर्वेषांतद्व्यतिरिक्तविषयेभ्यउप
रमणमुपरतिः अथवाविहितानांकर्मणांविधिनापरित्यागः गुणविषयेचस
माधिः समाधानं गुरुवेदांतवाक्येषु विश्वासः श्रद्धा मुमुक्षुत्वं मोक्षेच्छावत्त्वंम
एवंभूतः प्रमाताअधिकारी शांतोदांतइत्यादिश्रुतेः उक्तंच प्रशांतचित्ताय जितेंद्रि
याय प्रहीणदोषाययथोक्तकारिणे गुणान्वितायानुगतायसर्वदाप्रदेयमेतत्स
ततंमुमुक्षवे विषयोजीवब्रह्मैक्यं शुद्धचैतन्यंप्रमेयम् तत्रैववेदांतानांतात्पर्या
त् संबंधस्तु तदैक्यप्रमेयस्यतत्प्रतिपादकोपनिषत्प्रमाणस्यबोध्यबोधकभाव
लक्षणः प्रयोजनंतदैक्यप्रमेयगताज्ञाननिवृत्तिस्वस्वरूपानंदावाप्तिश्च ।

वे·सा·
२

नानांचावांतरफलं पितृलोकसत्यलोकप्राप्तिः कर्मणा पितृलोको विद्यया दे
वलोक इति श्रुतेः साधनानि नित्यानित्यवस्तुविवेकेहामुत्रार्थफलभोग
विरागशमदमादिषट्कसंपत्तिमुमुक्षुत्वानि नित्यानित्यवस्तुविवेकस्तावद्ब्रह्मै
व नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनं नित्यानित्यवस्तुविवेकः ऐ
हिकानां स्रक्चंदनादिविषयभोगानां कर्मजन्यतयाऽनित्यत्ववदामुष्मिका
णामप्यमृतादिविषयभोगानामनित्यतया तेभ्यो नितरां विरतिरिहामुत्रार्थ
फलभोगविरागः शमादयस्तु शमदमोपरतितितिक्षासमाधानश्रद्धाख्याः
शमस्तावच्छ्रवणाद्व्यतिरिक्तविषयेभ्यो मनसो निग्रहः दमो बाह्येंद्रियाणां

राम
२

साधनचतुष्टयसंपन्नः प्रमाता काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादी
नि निषिद्धानि नरकाद्यनिष्टसाधनानि ब्रह्मणहननादीनि नित्यान्यकर
णे प्रत्यवायसाधनानि संध्यावंदनादीनि नैमित्तिकानि पुत्रजन्माद्यनुबंधी
नि जातेष्ट्यादीनि प्रायश्चित्तानि पापक्षयसाधनानि चांद्रायणादीनि उ
पासनानि सगुणब्रह्मविषयकानि मानसव्यापाररूपाणि शांडिल्यविद्या
दीनि एषां नित्यादीनां बुद्धिशुद्धिः परं प्रयोजनम् उपासनानां तु चित्तैकाग्र्यं
तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेनेत्यादिश्रुतेः तपसा
कल्मषं हंति विद्ययामृतमश्नुते इत्यादिस्मृतेश्च नित्यनैमित्तिकयोरुपासा

1486

11

वे॰सा॰
१

श्रीमते रामानुजाय नमः अखंडं सच्चिदानंदमवाङ्मनसगोचरम् आत्मानम-
खिलाधारमाश्रयेभीष्टसिद्धये १ अर्थतोप्यद्वयानंदानतीतद्वैतभावतः गुरू
नाराध्य वेदांतसारं वक्ष्ये यथामति २ वेदांतोनामोपनिषत्प्रमाणम् तदुप-
कारीणि शारीरकसूत्रादीनि च अस्य वेदांतप्रकरणत्वात्तदीयैरेवानुबंधैः
तद्वत्तासिद्धेर्नते पृथगालोचनीयाः तत्रानुबंधोनामाधिकारिविषयसंबंध
प्रयोजनानि अधिकारी तु विधिवदधीत वेदवेदांगत्वेनापाततोधिगताखिल
वेदार्थोऽस्मिन्जन्मनि जन्मांतरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिक
प्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितांत निर्मलस्वांतः

राम
१